MSS No. 185 Subject Philosophy

Name of MSS अमरकोश

Author अमरसिंह

Period 1864 वि० Folios 12

Script Sanskrit Source Prithipal Singh, Amritsar


Missing Folios

ईशावास्योपनिषत्

शंकर भाष्य

ह.पं. १८१

Sans. MS. 294.592		
I 79 185-MS.		ईशावास्योपनिषत्: शांकरभाष्य; आनंदगिरि व्या०। मंगलवार, मेषार्कमुक्तदिनानि २२, १८६४ वि० देवपुरस्थ केशवरामेणलिखित॥ १३ पत्रक॥ ल०भ०११पं०प्र०पृ० ह०ल०



ईशावास्योपनिषत्

185

44



ई॰ भा॰ टी॰ १

ॐ श्रीगणेशाय नमः ॥ येनात्मना परेणेशावास्यं विश्वमशेषतः । सोऽहं देहद्वयीसाक्षी वर्जितो देहतद्गुणैः ॥ १ ॥ ईशावास्यमित्यादिमंत्राणां व्याचि
ख्यासुर्भगवान्भाष्यकारस्तेषां कर्मशेषत्वशंकां तावद्दूषयति तथाहि कर्मजडाः केचिन्मन्यते ईशावास्यमित्यादयो मंत्राः कर्मशेषा मं
त्रत्वादिषेत्वेत्यादिमंत्रवत् तः पृथक्प्रयोजनाद्यभावात् व्याख्येया इति तान्प्रत्याह ईशावास्यमित्यादय इति कर्मस्वविनियुक्ता इति इषेत्वे
ति शाखां छिनत्तीत्यादिवद्विनियोजकप्रमाणादर्शनात् करणांतरत्वाद्वेत्यर्थः श्रौतविनियोगाभावेपि लिंगात् बर्हिर्देवसदनं दामीत्यस्य
बर्हिर्लवनप्रकाशनसामर्थ्याद्बर्हिर्लवने यथा विनियोगस्तथा कर्मशेषात्मप्रकाशनसामर्थ्येन कर्मस्वेषां विनियोग इत्यपि नाशंकनीयमि।

ॐ परमात्मने नमः ॐ ईशावास्यमित्यादयो मंत्राः कर्मस्वविनियुक्ताः तेषामकर्मशेषस्यात्मनो याथात्म्यप्रकाशकत्वात् याथात्म्यं
चात्मनः शुद्धत्वापापविद्धत्वैकत्वनित्यत्वाशरीरत्वसर्वगतत्वादि वक्ष्यमाणं तच्च कर्मणा विरुध्यत इति युक्त एवैषां कर्मस्वविनियोगः

त्याह तेषामिति शुद्ध्यादिविशेषणस्यात्मनः कर्मशेषत्वे प्रमाणाभावात् यथात्म्यं न केवलं कर्मानुपयोगि किंतु कर्मणा विरुध्यत इत्याह या
थात्म्यं चेति शुद्धो हि स्वभावतोऽनन्तकेनापि पाप्मनाविद्धः सर्वत्रैकोऽशरीरस्त्वाकाशोपमः ईजानस्तु कदाचनापि कर्मवीत्ततेः किंत्वापातप्रतिपत्ति
रप्येतादृशी निरुणद्ध्येव कर्मप्रवृत्तिमित्यर्थः किंच यः कर्मशेषः स उत्पाद्यो दध्यादिः यथा पुरोडाशादिर्विकार्यः सोमादिराप्यो मंत्रादिः संस्कार्यो व्री
ह्यादिस्तद्वत्पाद्यादिरूपत्वव्यापकं यावर्तमानमात्मयाथात्म्यस्य कर्मशेषत्वमपि व्यावर्तयति ॥ ॥ ॥

नि॰ २ राम २

नयात्म्ययाथात्म्यं कर्तृभोक्तृत्वं न भवतीत्येन ममेदं मयेहितं साधनं ततो मया कर्तव्यमिदं कारणत्वं यथा पुरःसरं कर्तृत्वं यस्यास्तीत्याह नचैवमिति
ननु उपनिषदां जपोपयोगित्वादन्यस्य च प्रमाणस्यादर्शनान्न निरूप्यमेवैतादृशमात्मयाथात्म्यमत आह सर्वासामिति यत्परः शब्दः स शब्दार्थ
इति मीमांसाप्रसिद्धेः सर्वासामुपनिषदां चैकात्म्यतात्पर्यदर्शनान्न जपोपयोगित्वमुपनिषदां शक्यं वक्तुं तथाहीशावास्यमित्युपक्रम्य सपर्य
गाच्छुक्रमित्युपसंहारादनेजदेकं तदन्तरस्य सर्वस्येत्यभ्यासदर्शनान्नैनद्देवा आप्नुवन्नित्यपूर्वतासंकीर्तनात्को मोहः कः शोक एकत्वमनुप

नचैवंलक्षणमात्मनो याथात्म्यमुत्पाद्यं विकार्यमाप्यं संस्कार्यं कर्तृभोक्तृ वा येन कर्म ॥
शेषता स्यात्सर्वासामुपनिषदामात्मयाथात्म्यनिरूपणेनैवोपक्षयात् ॥ ॥

श्यत इति फलवत्तासंकीर्तनात्कुर्वन्नेवेह कर्माणि जिजीविषेदिति भेददर्शिनः कर्मकरणानुवादेनासुर्या नाम त इति निंदयैकात्म्यदर्शनस्य स्तुत
त्वात्तस्मिन्नपो मातरिश्वा दधातीति युक्त्यभिधायिन्याभ्यासस्याप्यावदुपनिषदमैकात्म्यतात्पर्यं दृश्यते एवमन्यासामप्युपनिषदामुपक्र
मोपसंहारैकवाक्याभ्यासापूर्वताफलवत्तार्थवादयुक्त्युपपादनानि षड् तात्पर्यलिंगानि विकल्पेन समुच्चयेन वास्माभिस्तत्त्वालोके द
र्शितानीति नेह प्रतन्यते किंच प्रत्यक्षसंवादोऽपि बलवत्कारणं प्रसिद्धं विद्यते चोपनिषदर्थे गीतादिसंवादस्तस्मादुपनिषत्सु समन्वयेना
वगम्यमानमैकात्म्यं न प्रमाणान्तरानुपलंभविरोधेनोपालंभनीयं यथेन्द्रियान्तरेणानवगम्यमानमपि रूपं चक्षुषावगम्यमानं नापह्नूयते

ई॰भा॰टी॰ न ह्येकात्म्यमपि नापकृष्टाईमित्याह गीतानामिति समं सर्वेषु भूतेषु तिष्ठन्तं परमेश्वरं विनश्यत्स्वविनश्यन्तं यः पश्यति स पश्यतीत्यादि
२ गीतानामेक एव हि भूतात्मा भूते भूते व्यवस्थितः एकधा बहुधा चैव दृश्यते जलचन्द्रवदित्यादिमोक्षशास्त्राणां चैकात्म्यपरत्वादित्यर्थः
त॰३ यद्येतान्स्वात्मतत्त्वं हि निरधिकारत्वात्कर्मकाण्डमुच्छिद्येतेत्यपि नाशङ्कनीयमित्याह तस्मादिति औपनिषदात्मयाथात्म्यविज्ञानवत
इष्यत एव कर्मकाण्डप्रमाण्यं यथा न हिंस्यात्सर्वा भूतानीति निषेधशास्त्रार्थनिश्चयवत इष्यत एव यजेतेनादि विधिप्रामाण्यं यथा च तीव्रक्रोधा

गीतानां मोक्षधर्माणां चैवं परत्वात् तस्मादात्मनो नेकत्वकर्तृत्वभोक्तृत्वाद्यहंत्वादिचोपाधायलोकबुद्धिसिद्धं कर्माणि विहितानि यो
हि कर्मफलेनार्थी दृष्टेन ब्रह्मवर्चसादिनादृष्टेन स्वर्गादिना च द्विजातिरहं न काणकुब्जत्वाद्यनधिकारप्रयोजकधर्मवानित्या

ॐ ईशावास्यमिदं सर्वं यत्किंच जगत्यां जगत् तेन त्यक्तेन भुंजीथा मा गृधः कस्यस्विद्धनम् ॥१॥

त्मानं मन्यते सोधिक्रियते कर्मस्वित्यधिकारविदो वदन्ति तस्मादेते मन्त्रा आत्मनो याथात्म्यप्रकाशनेनात्मविषयं स्वाभाविकमज्ञानं नि
वर्तयन्तः शोकमोहादिसंसारधर्मविच्छित्तिसाधनमात्मैकत्वादिविज्ञानमुत्पादयन्तीत्येवमुक्ताधिकार्यभिधेयसंबंधप्रयोजनान्मंत्रान्संक्षे

क्रोधसंतप्तोपि अन्येन वशेनादि विधिप्रामाण्यं तथा मिथ्याज्ञानदर्शिनं प्रत्येव कर्मविधिप्रामाण्यमित्यर्थः अत्र नेमि निप्रभृतीनां संमतिमाह यो हीत्या राम
हि नाग्नेयाथित्वादियुक्तस्य कर्माधिकारः पक्षेमतिष्ठापितः तच्चार्थित्वादि मिथ्याज्ञाननिदानं न हि निर्भावन्निष्क्रियस्य स एवं द्वैः स्वाभिमर्गि
णः परमानंदस्वभावमसुखं मेस्याहुः स्वं मे मा भूदित्यर्थित्वं शरीरेन्द्रियसामर्थ्येन च समर्थोहमित्यभिमानित्वं मिथ्याज्ञानेन विना संभवतीत्यर्थः

यस्मादात्मयाथात्म्यप्रकाशकामंत्रानकर्मविधिशेषभूतानचमानांतरविरुद्धार्थास्तस्मात्प्रयोजनवीदिमत्त्वमपितेषांसिद्धमित्याह

त्व तस्मादेतदिति व्याख्येयपदेमुखकाप्रतिपदंव्याचष्टे ईशेति ईशऐश्वर्येअस्यधातोः क्विपिलुप्तेकृदंतरूपमीट् तस्यतृतीयैकवचनमीशेति न।

नुकर्त्रैरिक्विप् विधानात्परमेश्वरस्याक्रियत्वात्कथंक्विवंतशब्द वाच्यतेतितत्राह ईशितेति मायोपाधिसन्कर्तृत्वसंभवात्क्विवंतश।

ब्दवाच्यतानविरुद्धातेनिरुपाधिकस्यचतत्त्वं भविष्यतीत्यर्थः ईशित्रीशितव्यभावेनतर्हिभेदः प्राप्नुस्त्याशंक्याह सर्वजंतूनामिति।

यथादर्शादिषुप्रतिबिंबानामात्माबिंबभूतोपेश्वरस्तैरीशितामवश्यं[illegible]नार्थिकेनांयेन॥ त्य२

ईशाईष्टइतीट्तेनेशाईशितापरमेश्वरः परमात्मासर्वस्यसहिसर्वमीष्टे सर्वजंतूनामात्मासन्नेनेस्वेनात्मनाईशा वास्यमाच्छादनीयंकिं

मिदंसर्वंयत्किंचजगत्यांपृथिव्यांजगत्तत्सर्वंस्वेनात्मनाहमेवेदंसर्वमितिपरमार्थसत्यरूपेणानृतमिदंसर्वमाच्छादनीयंईशेनपरमात्मना

यथाचंदनागुर्वादेरुदकादिसंबंधजक्लेदादिदौर्गंध्यंतत्स्वरूपनिघर्षणेनाच्छाद्यतेस्वेनपारमार्थिकेनगंधेन॥

तितथाकल्पितभेदेनेशित्रीशितव्यभावसंभवान्नवास्तवभेदानुमानंसंभवतीत्यर्थः अस्याच्छादनेप्रत्यग्रूपंवास्यंतत्त्वनिर्ईश्वरात्मकमेवसर्वंध्यो

त्याच्छादनीश्वररूपेणागृहीतंतत्सर्वमीश्वरएवात्मैवेतिज्ञानेनाच्छादनीयंसर्वात्मैवेतिज्ञानेनाच्छादनीयंसर्वात्मकईश्वरोस्मीतिज्ञानव्याशेषत।

त्वोपदेशःछांदोग्येतत्त्वमसीतिवदित्यर्थः अद्वैवसर्वमात्मैवसत्प्रकाशाविशेषतः हेयोपादेयभावोयेनसत्त्वप्रवर्ध्यतेउक्तंचनत्वंधीस्तिनमा।

तोस्तिनविकल्पोस्तिनविकल्पोस्तितत्त्वतः नित्यप्रकाशरूपात्मनिविश्वाकारेणमहेश्वरइत्यूह्योपदेशिकतानमात्रेणास्तततदृष्टिनेनिराक्रियतेत

स्याविचारादिप्रयत्नेनतत्त्वप्रकाशेसत्यनृतदृष्टिस्तिरस्करिष्यतइत्यभिप्रेत्यदृष्टांतमाह यथेति चंदनागुर्वादेरुदकादिसंबंधार्द्रीभावादिना।

जातंयद्दौर्गंध्यमौपाधिकंमिथ्यातद्यथातत्स्वरूपनिघर्षणाभिव्यक्तेनस्वाभाविकेनगंधेनाच्छाद्यते॥ राम॥ =॥

ई॰भा॰टी॰
३

क

तद्बुद्धिचारादेः स्वस्य सद्भावान्मिथ्याबुद्धिबाधत्वं संभवतीत्याह तद्बुद्धेवरिति स्वभावेनादिरविद्यातत्कार्यं स्वाभाविकमित्यादिवाध्यत्वेयोग्यत्व
प्रदर्शनार्थविशेषणं एवं विचारादिमयत्नवतोः स्वतः क्षितिरस्कारं संभावनामुक्तापुरुषनमित्यस्य सर्वमिदमहं चेश्वर एवेति भावनायामधिकृ
तस्य युक्तिक्रमात्तस्य चोपचारे धिकृतस्य सर्वकर्मसंन्यासएवाधिकार इह मेव विवतितस्तेन त्यक्तेनेत्यत्र त्यागवाचकशब्दशनात्सम्जनेवदितेन
त्यक्तः अत एव परंपर मित्यनुगम्य तत्रानुत्राध्येषणायाश्चिकृत विवेतं पदेनुवेन मसिद्धत्वाच्चे त्यभिप्रेत्याह अनीश्वरात्मेति विकीर्षितसंन्यासं सूत्येति
तेन त्यक्तेनेति त्यागेनात्मारतिस्तेनस्वाप्तिक्रियात्मत्वरंतांगृधिं माकार्षीरित्यर्थः ॥१॥

तद्धेवदेव हि यात्मन्यधयस्तं स्वाभाविकं कर्तृत्वभोक्तृत्वादिलक्षणं जगत्तद्धेतत्रयं पृथिव्यां जगत्यामित्युपलक्षणार्थत्वात्सर्वमेव नाम रूपक
र्मास्त्रं विकारजातं परमार्थसत्यात्मभावनया त्यक्तं स्यात् एवमीश्वरात्मभावनया युक्तस्य पुत्राद्येषणात्रय संन्यासएवाधिकारो न कर्मस्विति न
त्यक्तेन त्यागेनेत्यर्थः नहि त्यक्तोमृतः पुत्रोः भृत्योवात्मसंबंधिताया अभावादात्मानं पालयत्यतस्त्यागेनेत्ययमेवार्थः भुंजीथाः पालयेथाः
एवं त्यक्तेषणात्वं मागृधः गृधिमाकांक्षां माकार्षीर्धनविषयां कस्यस्वित्कस्यचित्परस्य स्वस्य वा धनं माकांक्षीरित्यर्थः स्विदित्यनर्थको निपा
तः अथवा मागृधः कस्मात्कस्यस्विद्धनमित्याक्षेपार्थः न कस्यस्विद्धनमस्ति यद्गृध्येतात्मैवेदं सर्वमितीश्वरभावनया सर्वं त्यक्तमत आत्मन एवे
दं सर्वमात्मैव च सर्वमतो मिथ्याविषयां गृधिं माकार्षीरित्यर्थः १

आ परमार्थतः सत्यात्मैव सर्वमित्याक्रांता विषय एव नास्तीत्यर्थः

पावस्यानानुकूलत्वात्त्यागमेवेत्यर्थः संन्यासिनः शरीरसंधारणोपयुक्तकौपीनाच्छादनभिक्षाशनादिव्यतिरिक्तेपि किंचिद्व्यपरिग्रहे रागप्रसक्तौ
तन्निरोधे यत्नः कर्तव्यस्तस्य प्रधानविरोधित्वादित्यभिप्रेत्य नियमविधिमाह एवं त्यक्तेषणास्त्विति स्विदितिनिपातस्य सामान्यार्थत्वे विकस्यस्विदिति
विलक्षणार्थत्वमन्यत्रप्रसिद्धं तदिह भाष्यनेरत्यनर्थकमित्युक्तं अवहारस्याख्यान्मन एवेदं सर्वं शेषमतेजडस्यचित्परतंत्रत्वात्ततः प्राप्तविषयेनाकांक्षाकर्ते

राम
३

आद्यमंत्रस्य स्वार्थेन तत्वोपदेशः कृतस्तृतीयपादेनावशिष्टज्ञानस्य संन्यासविधिः कृतश्चतुर्थपादेन संन्यासिनो नियमविधिः कृत इति प्रतिपदं व्या।
ख्याय संन्यासपर्यमनुवदत्युत्तरस्य संबंधाभिधित्सया एवमात्मविद इत्यादिना सर्वमंत्रेण ज्ञानं विहितं पूर्वतस्यैवोत्तरमंत्रेण कर्म विहितं ततः समुच्चा-
यानुष्ठानेनात्यर्थं मंत्रद्वयस्येत्येकदेशीशंकामुद्भावयति कथं पुनरित्यादि इत्यनुष्ठानकर्माणि

एवमात्मविदः पुत्राद्येषणात्रयसंन्यासेनात्मज्ञाननिष्ठतयात्मा रक्षितव्य इत्येष वेदार्थः अथेतरस्यानात्मज्ञतयात्मग्रहणाशक्त-
स्येदमुपदिशति मंत्रः कुर्वन्नित्यादि कुर्वन्नेवेति निर्वर्तयन्नेव कर्माण्यग्निहोत्रादीनि जिजीविषेत् जीवितुमिच्छेत् शतं समाः शतसंख्या।
काः समाः संवत्सरान् तावद्धि पुरुषस्य परमायुर्निरूपितं यथा प्राप्तानुवादेन यज्जिजीविषेच्छतं वर्षाणि तत्कुर्वन्नेव कर्माणीत्येतद्विधीय

कुर्वन्नेवेह कर्माणि जिजीविषेच्छतं समाः एवं त्वयि नान्यथेतोस्ति न कर्म लिप्यते नरे ॥२॥

ते एवं एवंप्रकारेण त्वयि जिजीविषति नरे नरमात्राभिमानिनि इत एतस्मादग्निहोत्रादीनि कर्माणि कुर्वतो वर्तमानात् अन्यथा प्रका-
रान्तरं नास्ति येन प्रकारेणाशुभं कर्म न लिप्यते कर्मणा न लिप्यत इत्यर्थः अतः शास्त्रविहितानि कर्माण्यग्निहोत्रादीनि कुर्वन्नेव जि-
जीविषेत् कथं पुनरेवमवगम्यते इदं पूर्वेण मंत्रेण संन्यासज्ञाननिष्ठोक्ता द्वितीयेन तदशक्तस्य कर्मनिष्ठेत्युच्यते ॥ २ ॥ २

नैकाधिकारिकत्वे विरुद्धत्वात् स्वर्गगमनत्रिदंडिधर्मवदस्त्वेकत्रापि क्रमेणैककर्तृकत्वमिति चेन्न विशिष्टरूपभेदात् भिन्नाधिकारत्वात् यथ
योक्तं ज्ञानकर्मणोर्विहितत्वेन श्रुतिसाम्यादविरोधो सिद्ध इति तदसत् स्वर्गगमनत्रिदंडिधर्मयोरप्यविरोधप्रसंगात् उभयं नैकस्य विहित
मिति चेत् तुल्यमेतत् प्रतिषेधाद्वचनसमुच्चय इति चेदिन्द्रापि न कर्मणा न प्रजयानानुध्याये बहून् शब्दानित्यादि प्रतिषेधस्तुल्यः ॥ २ ॥

ई॰भा॰टी॰
४

केवलकर्मविषयो निषेधस्तेन नवाक्यं केवलपदव्यवच्छेद्याभावात्समुच्चयविधेरध्याप्यनिश्चितत्वात्तस्मात्समुच्चये तात्पर्यं मंत्रद्वयस्येत्याह ज्ञा
नकर्मणोर्विरोधमिति कर्तृत्वाद्यध्यासात्स्वयं कर्मशुद्धत्वाकर्तृत्वादिज्ञाने नोपपद्यते इति यथोक्तं संबंधग्रंथे सज्ञानवस्त्यानलक्षणोविरोधं किं न स्मर
सि येनैकाधिकारत्वं तयोः कल्प्यमसीत्यर्थः मंत्रलिंगादपि तयोर्भिन्नाधिकारत्वं प्रतीयते इत्याह इहाप्युक्तमिति जिजीविषोराशिषः कर्मविहितं स
र्वमीश्वरत्ववेति ज्ञानवतस्त्यागो विहितः किंच धनसंपत्त्यैव कर्मण्यधिकारः प्रथमे मात्र्याधिकारिणस्तु धनाकांक्षानिषेधेन कर्माधिकारनिषेधः प्रती
यतेइत्यर्थः जिजीविषादिकर्माधिकारिणएव न ज्ञानाधिकारिण इत्यत्र प्रमाणमाह नजीवितइति श्वरुणपंक्तीजनासंकीर्णमाश्रमसियाद्धेकेदितिपदं

ज्ञानकर्मणोर्विरोधं पर्वतवदकंप्यं यथोक्तं न स्मरसि किं इहाप्युक्तं यो हि जिजीविषेत्स कर्म कुर्वन्निति ईशावास्यमिदं सर्वं तेन त्यक्तेन भुंजीथा मा गृधः
कस्यस्विद्धनमिति च न जीविते मरणे वा गृधिं कुर्वीतारण्यमियादिति पदं ततो न पुनरियादिति संन्यासशासनात् उभयोः फलभेदं च वक्ष्यति इ
मौ द्वावेव पंथानावनुनिष्क्रांततरौ भवतः क्रियापथश्चैव पुरस्तात्संन्यासश्च तयोः संन्यासपथ एवातिरेचयति न्यास एवात्यरेचयदिति तैत्तिरेयके।

शास्त्रनिष्ठातिस्ततोरण्यवासोपलक्षितात्संन्यासान्न पुनरियात्कर्म प्रत्युत्थान प्रत्यावृत्तिं कुर्यादिति जिजीविषादिरहितस्य संन्यासविधानादित्यर्थः इतश्च
नैकफलकामस्य ज्ञानकर्मणोरधिकारः प्रतिपत्तव्य इत्याह उभयोरिति कोमोहः कः शोक एकत्वमनुपश्यत इति संनिरस्तानर्थप्रमाणं ज्ञानफलं
वक्ष्यति संसारमंडलांतर्गतमेव च दैवं तत्राप्यायतं हिरण्यगर्भपदप्राप्त्यादिलक्षणं कर्मफलं वक्ष्यति अग्ने नय सुपथेत्यनेनेत्यर्थः नारायणोपनिषद्वा।
कामपि भिन्नाधिकारत्वे प्रमाणमाह इमौ द्वावेवेति पुरस्तात्सृष्टिकालेऽनुनिष्क्रांततरौ भवतः सृष्टिमनु प्रवृत्तौ भिन्नाधिकारत्वात् द्वौ तयोः न्या
सएवातिरिक्तः श्रेष्ठो भवति परमपुरुषार्थसाधनादित्यर्थः ॥ ॥ ॥

राम
४

॥ आत्मवाक्यमपि संवादकमाह द्वाविमाविति आद्यमंत्रार्थं प्रपंचयितुं प्रथममविद्वन्निंदा क्रियते इत्याह अथेति तेलोका इति तच्छ्लोकव्य
ख्यार्थं यथाश्रुतं येनयादृशं भवति षिद्धं विहितं वा देवताविज्ञानमनुष्ठितं समतदनुरूपामेव योनिं प्राप्नोतीत्यर्थः आत्महंतृत्वस्योदरभेदिनि प्रसिद्धेः
कथमविद्वांसः आत्महन इत्याह कथंतइति उदरभेदिनोध्यात्माधिकारे प्रसंगाभावादश्रुतत्वाध्याहारेणेन तिरस्कार

द्वाविमावथ पंथानौ यत्र वेदाः प्रतिष्ठिताः प्रवृत्तिलक्षणो धर्मो निवृत्तो चैव भाषित इत्यादि पुत्राय विचार्य निश्चितमुक्तं व्यासेन वेदाचार्ये
ण भगवता विभागं चानयोर्दर्शयिष्यामः अथेदानीमविद्वन्निंदार्थोऽयं मंत्र आरभ्यते असुर्याः परमात्मभावमद्वयमपेक्ष्य देवादयोऽप्यसु
राः तेषां च स्वभूता असुर्याः नाम नाम शब्दोऽनर्थको निपातः ते लोकाः कर्मफलानि लोक्यंते दृश्यंते भुज्यंते इति जन्मानि अंधेनात्मकेनाज्ञा
दर्शना

असुर्या नाम ते लोका अंधेन तमसावृताः तांस्ते प्रेत्याभिगच्छंति ये के चात्महनो जनाः ३

नेन तमसावृता आच्छादिताः तान् स्थावरांतान् प्रेत्य त्यक्त्वेमं देहमभिगच्छंति यथाकर्म यथाश्रुतं ये के चात्महनः आत्मानं घ्नंतीत्यात्महनः
के ते जनाः ये अविद्वांसः कथं ते आत्मानं नित्यं हिंसंति अविद्यादोषेण विद्यमानस्यात्मनस्तिरस्करणात् विद्यमानस्यात्मनो यत्कार्यं फलमजरा
मरत्वादि संवेदनादिलक्षणं तद्धतस्येव तिरोभूतं भवतीति प्राकृता अविद्वांसो जना आत्महन उच्यंते तेन ह्यात्महननदोषेण संसरंति ते ३ ॥ ॥

एवात्महंतृत्वमित्याह अविद्यादोषेणेति यथा कस्यचित् क्रुद्धस्य मिथ्याभिशापेऽशस्त्रवधश्च त्वनेन तद्धारात्मनि पापित्वाद्यध्यासोऽपि हिंसैवेत्यर्थः अजराम
रत्वादिलक्षणं रूपमिति संवेदनमभिधानं च यत्कार्यं तदपि हतस्येव न दृश्यत इति हननमुपचर्यत इत्याह विद्यमानस्येति अस्यात्मघातस्यापायश्चित्तविद्या नादर्शनात्संसरणमेव फलमित्याह तेन हीति

उत्तरमंत्रमवतारयति यस्मात्मन इत्यादिना अविक्रियमेकं चेदात्मतत्त्वं कथं केचनस्वर्गगामिनः केचन नरकगामिनः इति सांसारिकव्यवस्था स्यात्मनउपाधिनिबंधनेत्यभिप्रेत्याह मनसइत्यादिना उपाधेरनुवर्तमानात्तविक्रियादिव्यवहाराश्रयत्वमितिशेषः ननुमनसोदेहांतःस्थत्वा॥

यस्मात्मनोहननादविद्वांसः संसरंतितद्विपर्ययेणविद्वांसोजनामुच्यंतेनात्महननात्कीदृशमात्मतत्त्वमित्युच्यते अनेजत्तनएजृकंपने कंपनंचलनंस्वावस्थाप्रच्युतिस्तद्विवर्जितंसर्वदैकरूपमित्यर्थः तच्चैकंसर्वभूतेषुमनसः संकल्पादिलक्षणाज्जवीयोजववत्तरं कथं विरुद्धमुच्यतेध्रुवनिश्चलमिदंमनसोजवीयइतिचनैषदोषः निरुपाध्युपाधिमत्त्वोपपत्तेः तत्रनिरुपाधिकेनरूपेणोच्यतेअनेज

अनेजदेकंमनसोजवीयोनैनदेवाआप्नुवन्पूर्वमर्षत्

देकमिति मनसोंतःकरणस्यसंकल्पात्मकस्योपाधेरनुवर्तमानात् देहस्थस्यमनसोब्रह्मलोकादिदूरस्थसंकल्पनेनक्षणमात्राद्भवत्यतो मनसोजविष्ठत्वंलोकेप्रसिद्धं तस्मिन्मनसिब्रह्मलोकादीन्द्रुतंगच्छतिप्रथमंप्राप्तइवात्मचैतन्याभासोगृह्यतेतोमनसोजवीयइत्याह नै नद्देवाः द्योतनाद्देवाश्चक्षुरादीनीन्द्रियाणिएतत्प्रकृतमात्मतत्त्वंनाप्नुवन्नप्राप्तवंतः तेभ्योमनोजवीयोमनोव्यापारव्यवहितत्वात् आभास

द्विनिर्गमनायोग्यत्वात्कथंवेगवत्त्वमित्याशंक्याह देहस्थस्येति जवीयस्त्वदर्शादिवद्विंचक्षुरादिग्राह्यत्वंप्राप्नमित्याशंक्याह नैनद्देवाइति। चक्षुरादिप्रवृत्तेर्मनोव्यापारपूर्वकत्वात्तदविषयत्वेचक्षुरादिविषयत्वमप्यात्मनोनसंभवतीत्यर्थः॥ ॥ ॥ ॥ ॥

मनसोवाकथंनविषयस्तात्मेत्यतआह यस्मादिति यद्यात्मनःस्वंपरिमाणंमनसोनविषयोस्तेनाव्यवधानात्तथात्माप्यत्येनाव्यवधानोत्मनसो
नविषयत्वव्यापकत्वाच्चेत्यर्थः उक्तात्मसंभावनायोग्यतांनिमाह तस्मिन्नात्मतत्वेसतीति श्रौतानिकर्माणिसोमाज्यपयःप्रभृतिभिरद्भिःसं

यस्माज्जवनात्मनसोपिसर्वमर्षत्सर्वमेवगतंव्योमवद्व्यापितात्सर्वव्यापितदात्मतत्वंसर्वसंसारधर्मविवर्जितंस्वेननिरुपाधिकेनस्व
रूपेणाविक्रियमेवसदुपाधिकृताःसर्वाःसंसारविक्रियाअनुभवतीवाविवेकिनांमूढानामनेकमिवचप्रतिदेहंप्रत्यवभासतइत्ये
तदाह तद्धावतोद्रुतंगच्छतोन्यानात्ममनोवागिंद्रियप्रभृतीनात्मविलक्षणानत्येतिअतीत्यगच्छतीवइत्यर्थंस्वयमेवदर्शयतितिष्ठदिति
स्वयमविक्रियमेवसदित्यर्थः तस्मिन्नात्मतत्वेसतिनित्यचैतन्यस्वभावेमातरिश्वामातर्यंतरिक्षेश्वयतिगच्छतीतिमातरिश्वावा

तद्धावतोन्यानत्येतितिष्ठत्तस्मिन्नपोमातरिश्वादधाति ४

युःसर्वप्राणभृत्क्रियात्मकोयदाश्रयाणिकार्यकरणजातानियस्मिन्नोतानिप्रोतानिचयत्सूत्रसंज्ञकंसर्वजगतोविधारयितृसमा
तरिश्वाअपःकर्माणिप्राणिनांचेष्टालक्षणानिअग्न्यादित्यपर्जन्यादीनांज्वलनदहनप्रकाशाभिवर्षणादिलक्षणानिदधातिविभज
तीत्यर्थःधारयतीतिवाभीषास्माद्वातःपवतइत्यादिश्रुतिभ्यःसर्वाहिकार्यकरणादिविक्रियानित्यचैतन्यात्मस्वरूपेसर्वास्पदभू

तायांतेष्वितिसंबंधात्तत्कारणकोपःशब्दःकर्मसुप्राणिचेष्टायाश्चापनिमित्तत्वप्रसिद्धेःकारणवाचकःशब्दःकार्येलक्षणयाप्रयुक्तइत्यर्थःईश्वरस्या
पिहिरण्यगर्भस्यनियतप्रवृत्त्यन्यथानुपपत्त्यापिप्रणतापरमेश्वरःसंभाव्यतइत्युक्तमिदानींमातरिश्वग्रहणमुपलक्षणार्थमादायतात्पर्यमाहसर्वाहीति

ई॰भा॰टी॰ जामितान्यात्मस्वेव्याप्यापित्वाद्बाह्यतोपि निरतिशयसूक्ष्मत्वादंतश्चेदस्ति तर्हि निरंतरमेकरसं तस्यान्मानाभावादित्याशंक्याह अज्ञानवनएवेति

९ तमंतरा शृणं जामितास्तीति सर्वमंत्रोक्तमप्यर्थं पुनराह तदात्मतत्वं यत्प्रकृतं तन्नएजति चलति तदेव चैनेजति स्वतो नैव चलति अचलमेव स
च्चलतीवेत्यर्थः किंच तत्तद्दूरे वर्षकोटिशतैरविदुषामप्राप्यत्वात्तद्दूरे इव तद्वन्तिके समीपे स्यात् तमेव विदुषामात्मत्वात् न केवलं दूरे
तिके च तदंतरस्य तरस्यांतरेस्य सर्वस्य आत्मा य आत्मा सर्वांतर इति श्रुतेः अस्य सर्वस्य जगतो नामरूपक्रियात्मकस्य तदु अपि सर्वस्यास्य बा
ह्यतः व्यापकत्वादाकाशवन्निरतिशयसूक्ष्मत्वादतः अज्ञानवनएवेति शासनान्निरन्तरं ५ यस्तु यः परिव्राड् मुमुक्षुः सर्वाणि भूतान्यव्यक्ता

तदेजति तन्नैजति तद्दूरे तद्वन्तिके तदन्तरस्य सर्वस्य तदु सर्वस्यास्य बाह्यतः ५ यस्तु सर्वाणि भूतान्यात्मन्येवानुपश्यति सर्वभूतेषु
दीनि स्थावरांतानि आत्मन्येवानुपश्यति आत्मव्यतिरिक्तानि न पश्यतीत्यर्थः सर्वभूतेस्वेवात्मानं ते चात्मानं ततो न विचिकित्सति विजुग्प्सते
षामपि च भूतानां स्वात्मानमात्मत्वेन यथास्य कार्यकारणसंघातस्यात्माहं सर्वप्रत्ययसाक्षीभूतः चेतयिता केवलो निर्गुणोनेनैव स्वरू
पेणाव्यक्तादीनां स्थावरांतानामहमेवात्मेति सर्वभूतेषु चात्मानं यस्तु निर्विशेषमनुपश्यति स ततस्तस्मादेव दर्शनान्न विचिकित्सति विचि।
कित्सां घृणां न करोतीति प्राप्तस्यानुवादोयं सर्वो हि घृणात्मनोन्यद्दुष्टं पश्यतो भवत्यात्मानमेवात्यंतविशुद्धं निरंतरं पश्यतो न घृणानि

श्लो॰४ चि२

उक्तात्मज्ञानस्य फलं विधिनिषेधातीतं जीवन्मुक्तस्वरूपेणावस्थानमित्याह यस्त्विति ॥ राम ॥ ॥ राम ॥ राम ९

इममेवार्थमन्योपि मंत्र आह यस्मिन्निति निरतिशयानंदं स्वत एव दुःखास्पृष्टमात्मानमजानतः शोको भवति हा हतोहं न मे पुत्रोस्ति न मे क्षेत्र
मिति ततः पुत्रादीन्कामयते तदर्थं देवताराधनादि चिकीर्षति न त्वात्मैकत्वं पश्यतस्ततोऽन्वयव्यतिरेकाभ्यां शोकादेरविद्याकार्यत्वावधा

इममेवार्थमन्योपि मंत्र आह यस्मिन्सर्वाणि भूतानि यस्मिन्काले यथोक्तात्मानि वा तान्येव भूतानि सर्वाणि परमार्थदर्शनात्।
आत्मैवाभूदात्मैव संवृत्तः परमार्थवस्तु विजानतस्तत्र तस्मिन्काले तत्र चात्मनि वा को मोहः कः शोकः शोकश्च मोहश्च कामबीज

यस्मिन्सर्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यतः ७

मजानतो भवति न चैकत्वमेकात्मत्वं विशुद्धं गगनोपमं पश्यतः को मोहः कः शोक इति शोकमोहयोरविद्याकार्ययोराक्षेपेणासं-
भवप्रदर्शनात्सकारणस्य संसारस्यात्यंतमेवोच्छेदः प्रदर्शितो भवति ७

रणान्सकलाविद्यानिवृत्त्यैव शोकादेरात्यंतिकनिवृत्तिर्विद्याफलत्वेन विवक्षिता न्यवमात्रस्य सत्त्वेपि भावादित्याह शोकश्च मोहश्चेत्यादिना यो ई॰ टी॰ ८

योयमितिस्नुप्रस्रवणेधातुःस्नावयंतिशरीरमितिस्नावानिशिराः८ स्नाविरं २

ई·भा·टी· योयमतीतैर्मंत्रैरुक्तआत्मासस्वेनरूपेणकिंलक्षणइत्याहायंमंत्रः सपर्य्यगात्सयथोक्तआत्मापर्य्यगात्परिसमंतादगात्गतवान्आकाशव
द्व्यापीत्यर्थः शुक्रंशुद्धंज्योतिष्मद्दीप्तिमानित्यर्थः अकायअशरीरोलिंगशरीरवर्जितइत्यर्थः अव्रणमक्षतंअस्नावाःशिरायस्मिन्नविद्य
तइत्यर्थः अस्नाविरमव्रणमित्याभ्यांस्थूलशरीरप्रतिषेधः शुद्धंनिर्मलंअविद्यामलरहितमितिकारणशरीरप्रतिषेधः अपापविद्धंध
र्माधर्मादिपापवर्जितंशुक्रमित्यादीनिवचांसिपुल्लिंगत्वेनपरिणेयानिसपर्य्यगादित्युपक्रम्यकविर्मनीषीत्यादिपुल्लिंगत्वेनोपसं।

सपर्य्यगाच्छुक्रमकायमव्रणमस्नाविरꣳशुद्धमपापविद्धमकविर्म्मनी
षीपरिभूःस्वयम्भूर्याथातथ्यतोर्थान्व्यदधाच्छाश्वतीभ्यःसमाभ्यः८

हारात्कविः क्रांतदर्शीसर्वदृक्नान्योतोस्तिद्रष्टेत्यादिश्रुतेः मनीषीमनसईशितासर्वज्ञईश्वरइत्यर्थः परिभूःसर्वेषांपर्य्युपरिभवतीति।
परिभूः स्वयमेवभवतीतिस्वयंभूः येषामुपरिभवतियश्चोपरिभवतिससर्वःस्वयमेवभवतीतिस्वयंभूःसनित्यमुक्तईश्वरोयाथात
थ्यतः सर्वज्ञत्वाद्यथातथाभावोयाथातथ्यंयथाभूतकर्मफलसाधनतःअर्थान्कर्तव्यपदार्थान्व्यदधात्विहितवान्यथानुरूपं राम
व्यभजदित्यर्थः शाश्वतीभ्योनित्याभ्यः समाभ्यःसंवत्सरेभ्यःप्रजापतिभ्यइत्यर्थः ८॥ राम ॥ = ॥ राम ॥

ख्वे

प्रकरणविभागं दिदर्शयिषुर्वृत्तमनुवदति अत्राद्येनेति उक्तं भास्करेण सर्वास्वप्युपनिषत्स्वेवं ब्रह्मविद्याप्रकरणं ततः प्रकरणभेदे कर ॥॥
णमनुचिंतितं तस्मात् ज्ञानयुपासनविधानस्याप्युपनिषत्सु दर्शनात् नच तदापि ब्रह्मज्ञानांगमिति वाच्यं पृथक्फलश्रवणात् तेना ॥
पि व्याकृताव्याकृतोपासनसमुच्चयविधानस्य प्रकरणभेदेनैवेष्टत्वाद्व्याकृताव्याकृतोपासनस्य प्रकारांतरत्वान्नस्याद्यथा कर्मकांडेऽग्नि ॥॥
होत्रादिप्रकरणं भिन्नमेवेष्यते भिन्नाभिन्नाधिकारत्वान्नित्यकर्मणां तथोपनिषत्स्वपि भिन्नाधिकारत्वात्कर्मविरुद्धं तेहि विद्याप्रकरणं

अत्राद्येन मंत्रेण सर्वैषणापरित्यागेन ज्ञाननिष्ठोक्ता प्रथमो वेदार्थः ईशावास्यमिदं सर्वमा गृधः कस्य स्विद्धनमिति प्रज्ञानां जिजी
विषूणां ज्ञाननिष्ठासंभवे कुर्वन्नेवेह कर्माणि जिजीविषेदिति कर्मनिष्ठोक्ता द्वितीयो वेदार्थः अनयोश्च निष्ठयोर्विभागो मंत्रद्वयप्रद
र्शितयो बृहदारण्यकेपि प्रदर्शितः सोऽकामयत जाया मे स्यादित्यादिनाऽज्ञस्य कामिनः कर्माणीति मन एवास्यात्मा वाग्जाया इत्या
दिवचनाद् ज्ञत्वं कामित्वं च निश्चितमवगम्यते ॥ ॥ ॥

भेदो न विरुध्यते मंत्रार्थे ब्राह्मणसंमतिं दर्शयितुमुपक्रमते अनयोश्चेत्यादिना तत्र वाक्ये कथमज्ञत्वमवगम्यत इत्याशंक्याह मन एवेति ॥
जाया मे स्यादथ प्रजायेयाथ वित्तं मे स्यादथ कर्म कुर्वीयेति कामयमानस्य सर्वथैव वा यो जायादिर्यदा न संपद्यते तदाऽध्यात्मं जायादिसंपत्तिं॰ त दर्शयति
ज्ञातत्वलिंगं मनआदि स्यात्मत्वाद्यभिमानस्याज्ञानकर्मत्वात् यथा च वाह्यकामिन्यलाभे स्वप्ने मनोविजृंभितकामिनीमुपभुंजानो
ऽज्ञः प्रसिद्धस्तद्वदयमपीत्यर्थः ॥ ॥राम॥ ॥ स्वप्ने

तेषां च कर्मणां फलं संसार एवेत्यपि तत्र दर्शितमित्याह तथा चेति एकं साधारणमन्नं यदिदमद्यते द्वे देवानां हुतप्रहुते दर्शपूर्णमासौ वा त्रीण्यात्म
स्वभोगसाधनानि मनोवाक्प्राणलक्षणानि पश्वर्थमेकं पय इति सप्तान्नसर्गो दर्शितः श्रुत्या यत्सप्तान्नानि मेधया तपसाजनयत्पितेत्यादि
ना। तत्रैकैको यजमान एव विहितप्रतिषिद्धज्ञानकर्मानुष्ठानात्सर्वस्य संसारस्य स्रष्टा त्वारं पर्याप्तजनकत्वात्पितोच्यते सृष्टेष्वन्नेषु तस्य
पितुरहमिदं ममेदमित्यात्मत्वाध्यासेन मनआदिष्वितरेषु च संबंधाध्यासेनावस्थानं संसार इति प्रसिद्धमित्यर्थः एवं मंत्रप्रदर्शिते निष्ठाद्वये त्रा।

तथा च तत्फलं सप्तान्नसर्गस्तेष्वात्मभावेनात्मस्वरूपावस्थानं जायाद्येषणात्रयसंन्यासेन चात्मविदां कर्मनिष्ठाप्रातिकूल्येनात्म
स्वरूपनिष्ठैव दर्शिता किं प्रजया करिष्यामो येषां नोऽयमात्मायं लोक इत्यादिना ये तु ज्ञाननिष्ठाः संन्यासिनस्तेभ्योऽसुर्या नाम ते इ
त्यादिनाविद्वन्निंदाद्वारेणात्मनो याथात्म्यं स पर्यगादित्येतदंतैर्मंत्रैरुपदिष्टं ते ह्यत्राधिकृता न कामिन इति तथा च श्वेताश्वतराणां
मंत्रोपनिषदि अत्याश्रमिभ्यः परमं पवित्रं प्रोवाच सम्यगृषिसंघजुष्टमित्यादि विभज्योक्तं ये तु कर्मनिष्ठाः कर्म कुर्वंत एव जिजीविष
वस्तेभ्य इदमुच्यते अंधं तम इत्यादि कथं पुनरेवमुपगम्यते न तु सर्वेषामित्युच्यते अकामिनः साध्यसाधनभेदोपमर्देन यस्मिन्स
र्वाणि भूतान्यात्मैवाभूद्विजानतः तत्र को मोहः कः शोक एकत्वमनुपश्यतः यदात्मैकत्वविज्ञानं तन्न केनचित्कर्मणा ज्ञानेन वा
वा[illegible]मूढः समुच्चिचीषति इह तु समुच्चिचीषयाऽविद्वदादिनिंदा क्रियते

ह्याणसंमतिं दर्शयित्वा प्रकरणविभागं दर्शयति ये तु ज्ञाननिष्ठा इत्यादिना अत्याश्रमिभ्य इत्यर्थः साध्यसाधनभेदोपमर्देन यदात्मैकत्वविज्ञानं यस्मि राम
न्सर्वाणि भूतान्यात्मैवाभूदित्यवधारणेनोक्तं एवाद्वैतेनोत्तरार्द्धेन च संसारनिवृत्तिफलमुक्तं तन्न केनचिदमूढः समुच्चिचीषत्यंधं तम ८
इत्यादौ तु समुच्चिचीषया विद्वदादिनिंदा दृश्यते ॥ ॥ ॥ श्रू२ ॥ ॥ ॥ ॥

इत्यत्याश्रमिभ्य २४
तत्र यदात्मैकत्वज्ञानं तन्न केनचित् कर्मणा ज्ञानेन वा =

सवध्यते=

ततः किमित्यत आह तत्र च वक्ष्यतीति कस्मात्तर्हि ज्ञानस्य समुच्चयः संभवतीत्यत आह यद्येवमिति यच्चोक्तं भास्करेणेईशावास्यमिति मंत्रेण ब्रह्मवि
प्रकरणोक्तत्वात्= द्यायाः प्रक्रांतत्वात्तस्या एव समुच्चीयमाना निर्दिश्यते इति तदसन्न हि प्रकृतमित्येतावता संबध्यते किंतु संबंधयोग्यत्वमुक्तं ब्रह्मात्मैकत्ववि
द्यायास्तु कर्तृत्वाद्यध्यासोपमर्दकत्वान्नास्ति कर्मसंबंधयोग्यता किंच यस्मिन्निष्यते पि फलस्य व्यवधानं भाव्यते तस्यैव सहकारिस धा
मुच्चयः इष्यते दर्शादेरिवैहत्वेकत्वमनुपश्यतः को मोहः कः शोक इत्येकत्वदर्शनसमकालमेव मोहादिनिवृत्त्यभिधानात् कालांत

तत्र च यस्यैवेन समुच्चयः संभवतीति न्यायतः शास्त्रतो वा तदिहोच्यते यदेवं विद्विद्वद्देवतादि
ज्ञानं कर्मसंबंधित्वेनोपन्यस्तं न परमात्मज्ञानं विद्ययादेवलोक इति पृथक्फलश्रवणात्

दीर्घं फलं ततो न सहकारिसमुच्चीयते किंच ब्राह्मणा विविदिषंति यज्ञेनेत्यादौ तत्तीयाश्रुत्या यज्ञादेरिष्यमाणवेदनकरणत्वेन संबं।
श्रुतितः= धः प्रतीयते तत्कथं दुर्बलेन प्रकरणेन सहकारितया संबंधः कल्प्यते प्रधानस्य च विद्यायाः सहकारिसंबंधविधित्सया निर्दे त्य प्रकृतं।
एवं चाग्निर्धुनायनपेक्षेति तत्र विरोधश्च समसमुच्चयस्य परेणापि नेष्यते विरोधेन परिजह्रे तस्मात्कर्माविरुद्धदेवताज्ञानस्यैव समुच्च
योत्र विधीयते न तु देवताज्ञानस्य कर्मफलातिरिक्तफलाभावात्समुच्चयो न संभवतीत्यत आह विद्यथेति ॥ राम ॥ ॥

ई॰भा॰टी॰ ननु समुच्चिचीषया निंदेति किमिति व्याख्यायते अध्ययनविधेर्मोक्षादरवाक्यपर्यवसानानुपपत्तेर्देवलोकादिप्राप्तेः फलाभासत्वात् ग्रहाणा
९ न यो ज्ञानकर्मणोरिहैकैकानुष्ठाननिंदा समुच्चिचीषया निंदापरैवैकैकस्य पृथक्फलश्रवणात् विद्यया तदारोहंति विद्यया दे
वलोकः न तत्र दक्षिणा यंति कर्मणा पितृलोक इति नहि शास्त्रविहितं किंचित्कर्म कस्यचिदकर्तव्यतामियात् तत्र ग्रंथेन दर्श। मइति श्रेन
नात्मकं तमः प्रविशंतीति के ये विद्यां विद्यायाः अन्यां विद्यां तां कर्मेत्यर्थः कर्मणो विद्याविरोधाभावात्तामविद्यामग्निहोत्रादिलक्ष
णामेव केवलामुपासते तत्पराः संतोनुतिष्ठंतीत्यभिप्रायः तत्तस्माद्धात्मकान्नमसोऽभ्यधिकं बहुतरमिव तमः प्रविशंति ते क

अन्धन्तमः प्रविशन्ति ये विद्यामुपासते ततो भूय इव ते तमो य उ विद्याया ँ रताः ॥९॥
अन्यदेवाहुर्विद्ययान्यदाहुरविद्यया इति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे ॥१०॥

मेहित्वा ये उ ये तु विद्यायामेव देवताज्ञाने रताः अभिरताः तत्रावालमिदं विद्याकर्मणोः समुच्चयकारणमाहान्यथा फलवद् फल
वत्वोस्तयोः सन्निहितयोरंगांगितैव स्यादित्यर्थः ॥ अन्यत्पृथगेव विद्यया क्रियते फलमित्याहुः वदंति अन्यदाहुरविद्यया कर्मणा
किं पुनस्तत्पृथक्फलं कर्मणा पितृलोकः विद्यया देवलोक इत्येवं शुश्रुम श्रुतवंतो वयं धीराणां धीमतां वचनं ये आचार्या नोऽस्मभ्यं त
त्कर्मज्ञानं च विचचक्षिरे व्याख्यातवंतस्तेषामयमागमः पारंपर्यागत इत्यर्थः ॥१०॥ यद्येवं निंदा किं नेष्यते तत्राह तयोर्ज्ञानकर्मणोरि ॥ राम
ति न फलशब्दो मोत्तेन्नढो भोगमनिच्छतामपि सन्निहिते फलव्यवहारदर्शनात् ततो यो देवलोकादिमुपादित्सते तस्यापि फलं भवत्येवेत्यर्थः २

यत एवं विद्यां चाविद्यां च देवताज्ञानं कर्म चेत्यर्थः यस्तदेतदुभयं सह एकेन पुरुषेणानुष्ठेयं वेद तस्यैवं समुच्चयकारिण एकपुरुषार्थ
संबंधः क्रमेण स्यादित्युच्यते अविद्यया कर्मणाग्निहोत्रादिना मृत्युं स्वाभाविकं कर्म ज्ञानं च मृत्युशब्दवाच्यमुभयं तीर्त्वातिक्रम्य विद्य
(सगुणदेवतात्म भाव=) या देवताज्ञानेनामृतं देवतात्मभावमश्नुते प्राप्नोति तद्ध्यमृतमुच्यते यद्देवतात्मगमनं ॥ अधुना व्याकृताव्याकृतोपासनयोः समुच्चिचीषया प्रत्ये
कं निंदोच्यते अंधं तमः प्रविशंति येऽसंभूतिं संभवनं संभूतिः सर्वस्य कार्यस्य सा संभूतिः तस्या अन्या असंभूतिः प्रकृतिः कारणमव्याकृता

हिरण्यगर्भाख्यं कार्यब्रह्म = २ प्रकृतिः =

विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते ११ अंधं तमः प्रविशंति येऽसंभूतिमुपासते
ततो भूय इव ते तमो य उ संभूत्यां रताः १२ अन्यदेवाहुः संभवादन्यदाहुरसंभवादिति शुश्रुम धीराणां ये नस्तद्विचचक्षिरे १३

ख्यां तामसंभूतिमव्याकृताख्यां प्रकृतिं कारणमविद्याकामकर्मबीजभूतामदर्शनात्मिकामुपासते ये ते तदनुरूपमेवांधं तमोऽदर्शना
त्मकं प्रविशंति ततस्तस्मादपि भूयो बहुतरमिव तमः प्रविशंति य उ संभूत्यां कार्यब्रह्मणि हिरण्यगर्भाख्ये रताः अधुनोभयोरुपासनयोः
समुच्चयकारणमवयवफलभेदमाह अन्यदेव पृथगेवाहुः फलं संभवात्संभूतेः कार्यब्रह्मोपासनादणिमाद्यैश्वर्यलक्षणं व्याख्यातवंत इत्य
र्थः तथान्यदाहुरसंभवात् असंभूतेरव्याकृतोपासनात् यदुक्तमंधं तमः प्रविशंतीति प्रकृतिलय इति च पौराणिकैरुच्यत इत्येवं शुश्रुम
धीराणां वचनं ये नस्तद्विचचक्षिरे व्याकृताव्याकृतोपासनफलं व्याख्यातवंत इत्यर्थः १३ ॥

ई॰भा॰टी॰ चित्तं ज्ञानमात्रापरमेश्वरत्वोपाधिर्मायां प्रकृतिं विद्यान्मायिनं तु महेश्वरमित्यादिश्रुत्यंतरप्रसिद्धा असंभूतिशब्देनोच्यते न च स्वतस्तस्य निर्विकारस्य सा
१० तात्प्रकृतित्वानुपपत्तेः भासकतयाभिमतस्तु परिणामवादस्तत्वालोके निरस्त एवास्माभिः सांसारिकदुःखानुभवाभावेन च सुषुप्तिवत्प्रकृतिलयस्य
पुरुषार्थत्वं मान न तावत्पुरुषपद्यते फलं च कर्मोपासनरूपप्रकृत्युपासनेपि परमेश्वर एव दास्यति ततो जडत्वात्प्रकृतेः फलदातृत्वानुपपत्तेरुपास्यात्व
यत एवमतः समुच्चयः संभूत्यसंभूत्युपासनयोर्युक्त एवैकपुरुषार्थत्वाच्चेत्याह संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन विनाशो धर्मोप
स्यकार्यस्य सतेन धर्मिणामभेदेनोच्यते विनाश इति तेन तदुपासनेनानैश्वर्यमधर्मकामादिदोषजातं च मृत्युं तीर्त्वा हिरण्यगर्भोपासनेन ह्य
णिमादिप्राप्तिः फलं तेनानैश्वर्यादिमृत्युमतीत्यासंभूत्याव्याकृतोपासनया अमृतं प्रकृतिलयलक्षणमश्नुते संभूतिं च विनाशं चेत्यत्रावर्णलो
पेन निर्देशो द्रष्टव्यः प्रकृतिलयफलश्रुत्यनुरोधात् मानवदैवविज्ञसाध्यं फलं शास्त्रलक्षणं प्रकृतिलयांतमेतावती संसारगतिः अतः परं

संभूतिं च विनाशं च यस्तद्वेदोभयं सह विनाशेन मृत्युं तीर्त्वा संभूत्यामृतमश्नुते १४ ॥

वेदोक्तमात्मैवाभूद्विजानत इति सर्वात्मभाव एव सर्वैषणासंन्यासज्ञाननिष्ठाफलमेवं द्विःप्रकारः प्रवृत्तिनिवृत्तिलक्षणो वेदार्थोऽत्र प्रकाशितस्तत्र प्र
वृत्तिलक्षणस्य वेदार्थस्य विधिप्रतिषेधलक्षणस्य कृत्स्नस्य प्रकाशने प्रवर्ग्यांतं ब्राह्मणमुपयुक्तं निवृत्तिलक्षणस्य प्रकाशने अत ऊर्ध्वं बृहदारण्यकं तत्र ॥
निषेकादिश्मशानांतं कर्म कुर्वन् जिजीविषेत् यो विद्यया सहापरब्रह्मविषयया तदुक्तं विद्यां चाविद्यां च यस्तद्वेदोभयं सह अविद्यया मृत्युं तीर्त्वा विद्ययामृत चाविद्यां
मश्नुत इत्युक्तं तत्र केन मार्गेणामृतत्वमश्नुत इत्युच्यते तद्यत्तत्सत्यमसौ स आदित्यो य एष एतस्मिन्मण्डले पुरुषो यश्चायं दक्षिणेक्षन्निति पुरुष एतदुभयं सत्य
ब्रह्मोपासीनो यथोक्तकर्मकृच्च यः सोंतकाले प्राप्ते सत्यात्मानमात्मनः प्राप्तिद्वारं याचते १४ यपन्निरित्य विकल्पोयमेव विस्तरेणोक्तमर्थजातं तु संक्षिप्यो
पसंहरति मानुषदैवविज्ञसाध्यमित्यादिना शरीरपात्रं गोभूहिरण्यादिसाधनसंपत्तिश्च मानुषं वित्तं देववित्तं देवताज्ञानं उत्तरग्रंथस्य संबंधाभिधित्सयार्थ राम
विशेषमनुवदति तत्र निषेकादीति तदुक्तमिति तं प्रत्युक्तमंत्रेण विद्यां चेति प्रापेति कामृत तत्फलमित्युक्तमस्माभिरिति योजना ॥ ॥ ॥ १०

हिरण्मयेन पात्रेण हिरण्मयमिव हिरण्मयं ज्योतिर्मयमित्येतत् तेन पात्रेणेवापिधानभूतेन सत्यस्यादित्यमंडलस्थस्य ब्रह्मणोऽपिहित
माच्छादितं मुखं द्वारं तत्त्वं हे पूषन्नपावृणु सत्यधर्माय तव सत्यस्योपासनात् सत्यं धर्मो यस्य मम सोऽहं सत्यधर्मा तस्मै मह्यमथवा यथाभूतस्य धर्मस्या
नुष्ठात्रे दृष्टये तव सत्यात्मनोपलब्धये १५ हे पूषन् जगतः पोषणात् पूषा रविः तथैक एव ऋषति गच्छतीत्येकर्षिः हे एकर्षे तथा सर्वस्य संयम
नाद्यमः हे यम तथा रश्मीनां प्राणानां रसानां च स्वीकरणात्सूर्यः हे सूर्य प्रजापतेरपत्यं प्राजापत्यः हे प्राजापत्य व्यूह
स्नापकं ज्योप५ विगमय रश्मीन्स्वान् समूह एकीकुरु उपसंहर तेजः [illegible] तेन यत्ते तव रूपं कल्याणतमं अत्यन्तशोभनं तत्ते तवात्मनः प्रसादात्पश्यामि किं चाहं न तु त्वा

हिरण्मयेन पात्रेण सत्यस्यापिहितं मुखं तत्त्वं पूषन्नपावृणु सत्यधर्माय दृष्टये १५ पूषन्नेकर्षे यम सूर्य प्राजापत्य व्यूह रश्मीन्समूह तेजो
यत्ते रूपं कल्याणतमं तत्ते पश्यामि योऽसावादित्ये पुरुषः सोऽहमस्मि १६ वायुरनिलममृतमथेदं भस्मान्तं शरीरम् ॐ क्रतो स्मर कृतं स्मर
क्रतो स्मर कृतं स्मर १७

वद्याचेयोसावादित्य१
ऽत्यमंडलस्थो व्याहृत्यवयवः पुरुषाकारत्वात् पूर्णो वानेन प्राणबुद्ध्यात्मना जगत्समस्तमिति पुरुषः पुरि शयनाद्वा सोऽहमस्मि भवामि १६ अथेदानीं
मम मरिष्यतः वायुः प्राणोऽध्यात्मपरिच्छेदं हित्वाधिदैवात्मानं सर्वात्मकमनिलममृतं सूत्रात्मानं प्रतिपद्यतामिति वाक्यशेषः लिंगं चेदं ज्ञानकर्मसं
स्कृतमुत्क्रामत्विति द्रष्टव्यं मार्गयाचनसामर्थ्यात् अथेदं शरीरमग्नौ हुतं भस्मान्तं भूयात् ओमिति यथोपासनं ओंप्रतीकात्मकत्वात्सत्यात्मकमग्न्याख्यं ब्र
ह्माभेदेनोच्यते हे क्रतो संकल्पात्मक स्मर यन्मम स्मर्तव्यं तस्य कालोऽयं प्रत्युपस्थितोऽतः स्मर एतावन्तं कालं भावितं कृतमग्ने स्मर यन्मया बाल्यप्रभृति
अनुष्ठितं कर्म तच्च स्मर क्रतो स्मर कृतं स्मर कृतं स्मरेति पुनर्वचनमादरार्थम् १७ व्याहृत्यवयव इति तस्य भूरिति शिर भुव इति बाहू स्वरिति प्रतिष्ठा पादा इति

टीका

ई॰भा॰टी॰ मंत्रान्यदर्शनोऽव्याख्याय संक्षेपतो विचारमारभते अविद्ययेत्यादिना अमृतत्वं चेति अमृतत्वं चेममुख्यमेवकस्मान्न गृह्यतेऽतिसंशयः ॥
११

पुनरप्यनेन मंत्रेण मार्गं याचते हे अग्ने नय गमय सुपथा शोभनेन मार्गेण हव्यपथेन निविशेषणं दक्षिणमार्गे निवृत्त्यर्थं निर्विशेषणं दक्षिणो न मार्गे
ण गतागतलक्षणेन अतो याचे त्वां पुनः पुनर्गमनागमनवर्जितेन शोभनेन पथा नय राये धनाय कर्मफलभोगायेत्यर्थः अस्मान् यथोक्तधर्म
विशिष्टान् विश्वानि सर्वाणि हे देव वयुनानि कर्माणि प्रज्ञानानि वा विद्वान् जानन् किंच युयोधि जयय विनाशय अस्मत् जुहुराणं कुटिलं वंचना
वियो॰ स्मद्॰

अग्ने नय सुपथा राये अस्मान्विश्वानि देव वयुनानि विद्वान् युयोध्यस्मज्जुहुराणमेनो भूयिष्ठां ते नमउक्तिं विधेम १८ ॥

त्मकमेनः पापं ततो वयं विशुद्धाः संतः इष्टं प्राप्स्याम इत्यभिप्रायः किंतु वयमिदानीं ते न शक्नुमः परिचर्यां कर्तुं भूयिष्ठां बहुतरां ते नु
भ्यं नमउक्तिं नमस्कारवचनं विधेम नमस्कारेण परिचरेम इत्यर्थः अविद्यया मृत्युं तीर्त्वा विद्ययामृतमश्नुते इति अत्र केचित् संश
यं कुर्वन्ति अत्र न मन्ति ह्यर्णार्थं संक्षेपतो विचारं करिष्यामः तत्र तावत्किंनिमित्तः संशयः इत्युच्यते विद्याशब्देन मुख्यपरमात्म राम
विद्यैव कस्मान्न गृह्यतेऽमृतत्वं च ॥ ॥ ॥ राम ११

शास्त्रीययोर्ज्ञानकर्मणोर्विरोधाविरोधौ शास्त्रीयावेव ग्राह्यौ न तर्कमूलावेतौ इति परेणोक्ते सिद्धान्ती शास्त्रसिद्ध एव विरोध इत्याह दूरमेते
त इति विषूची नाना गती विद्याविद्ये इयं विपरीते अतिशयेन विरुद्धे इत्यर्थः सहसंभवानुपपत्तेरिति कानुपपत्तिः को विरोधः का
ठके विरोधस्य श्रवणं तत् ज्ञातविद्याविद्ययोर्विरोधोस्त्विह त्वविरोधश्रवणाद् विरोधो भविष्यतीति न वाच्यं विरोधा[illegible]विरोध॥ ॥

ननु कथं परमात्मविद्यायाः कर्मणश्च विरोधात्समुच्चयानुपपत्तिः सत्यं विरोधस्तु नावगम्यते विरोधाविरोधयोः शास्त्रप्रमा। च
णकत्वात् यथा विद्यानुष्ठानं मंत्रविद्योपासनं च शास्त्रप्रमाणकं तथा तद्विरोधाविरोधावपि विषयौ न हि स्यात्सबोध्रतौ इति
शास्त्रादवगतं पुनः शास्त्रेणैव बाध्यते धूरिहिंसादिरिति एवं विद्याविद्ययोरपि स्यात् विद्याकर्मणोश्च समुच्चयो न दूरमेते विप
रीते विषूची अविद्या या च विद्येति श्रुतेः विद्यां चाविद्यां चेति वचनाद् विरोध इति चेन्न हि नु स्वरूपफलविरोधात् विद्यावि।
द्ययोर्विरोधाविरोधयोर्विकल्पासंभवात् समुच्चयविधानात् अविरोध एवेति चेन्न सहसमुच्चयसंभवानुपपत्तेः॥ ॥ ॥

॥ योः सिद्धत्वेन न विकल्पासंभवात् उदितानुदितहोमयोर्हि पुंषतंत्रत्वात् युक्तो विकल्पः तत्तु कर्मतंत्रे विरोध एवात् समुच्चयविधिवैविधित्वादि
ति चेन्न मुख्यब्रह्मविद्याविद्ययोः भक्तिविद्याविद्ययोरिव सहसंभवानुपपत्तेः समुच्चयविधिरसिद्धः सिद्धे समुच्चये विरोधो तद्बलाद्वि
रोधासिद्धिरविरोधावगमाच्च समुच्चयसिद्धिरित्यन्योन्याश्रयः स्यादित्यर्थः ॥ ॥

सह संभवानुपपन्नावपि क्रमेणैकाश्रये विद्याविद्ये स्यातामिति चेद्यदि सर्वमविद्यावज्ज्ञानं विद्येति क्रमस्तर्हीष्यत एव यदि पश्चान्न स्यात् संभवः
स्यात् न विद्योत्पन्नाविति सर्वसिद्धायाश्च विद्यायाः प्रध्वस्तत्वादन्यस्याश्चोत्पत्तौ कारणासंभवान्तल्लाभावे न जन्मसंभवायात्र ग्रहणानामपि वि
दुषोनुपपत्तिरित्यर्थः विद्योत्पत्तौ माभूदविद्याकामकर्म तु भविष्यति विदुषोपि व्युत्थानभिक्षाटनादिदर्शनादिदर्शनादित्याशंक्याह वि

क्रमेण स्यातां विद्याविद्ये इति चेन्न विद्योत्पत्तौ तदाश्रये विद्यानुपपत्तेः नह्यग्निरुष्णः प्रकाशश्चेति विज्ञानोत्पत्तौ यस्मिन्नाश्रये त
दुत्पन्नं तस्मिन्नेवाश्रये शीतोग्निरप्रकाशो वेति अविद्याया उत्पत्तिः नापि संशयो ज्ञानं वा यस्मिन् सर्वाणि भूतान्यात्मैवाभूद्वि
जानतः तत्र को मोहः कः शोक एकत्वमनुपश्यत इति शोकमोहाद्यसंभवश्रुतेः अविद्यायाः असंभवात्तदुपादानस्य कर्म
णोनुपपत्तिमवोचाम॥

द्यायाऽसंभवादिति चोदनाप्रयुक्तानुष्ठानं हि कर्म तत्रानेन सहनवतमनुत्विच्चीर्षितं ब्रह्मात्मैकत्वं तु साक्षादनुभवतो न चोदनासंभवति का
माभावात् कामिनो हि सर्वाश्चोदनाः अकामिनः क्रियाः काचिद्दृश्यते नेह कस्यचित् यद्यद्धि कुरुते जन्तुस्तत्तत्कामस्य चेष्टितमिति स्मरणात् विद्वच्छ
दे रीरस्थितिस्त्वविद्यालेशाश्रयात् कर्मशेषनिमित्तं तु विदुषो भिक्षाटनादि न कर्म चोदनाभावात् किं तु यावत्प्राणशरीरसंयोगभावि तत्कर्माभास राम
तत्र विद्वान् स्वगतमन्यते कर्मव्याधासोपादानाविद्याया असंभवान्नैव किंचित्करोमीति मन्यत इति भावः ॥ ॥ ॥ ॥ १२

यदुक्तममृतशब्देन मुख्यमेवामृतत्वं किं न गृह्यते विद्याशब्देन च परमात्मविद्येति न ग्राह्याऽमृतमिति मुख्यामृतत्वग्रहणे हि
रण्मयादिमंत्रेणोत्तरमार्गयाचनमनुपपन्नं स्यान्न तस्य प्राणा उत्क्रामंत्यत्रैव ब्रह्म समश्नुत इत्यादिश्रुतेः ततो मुख्यार्थबाधा॥
गौणार्थग्रहणमुक्तमित्यर्थः यस्माद्यौ तरं न संगच्छते तस्मादित्युपसंहारः ईशाप्रभृतिभाष्यस्य शांकरस्य प ॥ ॥ ॥

वि
निर्णीतं यथा
न परमात्मविद्यया कर्मणः कर्मणः समुच्चयः कृतः अविद्याकार्यस्य कर्मणो विद्याविरोधित्वात् विद्यया विरोधात् २
निर्णीतः
परमात्म

अमृतमश्नुत इत्यापेतिकममृतं विद्याशब्देन परमात्मविद्याग्रहणे हि रण्मयेत्यादिनोत्तरमार्गयाचनमनुपपन्नं स्या
त्तस्मादुपासनया समुच्चयः न परमात्मविज्ञानेनेति यथाव्याख्यात एव मंत्राणामर्थ इत्युपरम्यते इति श्रीगोविंदभग
वत्पूज्यपादशिष्यस्य परमहंसपरिव्राजकाचार्यस्य श्रीशंकरभगवतः कृतौ वाजसनेयीसंहितोपनिषद्भाष्यं संपूर्णमिति

श्रुतिरोचादिवत्...
स्य कर्मणां इति शेषः २

रमात्मनः संदोहकृतिसिद्ध्यर्थं प्रणीतं टिप्पणं स्फुटं ॥ इति श्रीमत्परमहंसपरिव्राजकाचार्यश्रीगोविंदभगवत्पूज्यपा ॥
दशिष्यश्रीशंकरभगवतः कृतौ वाजसनेयसंहितोपनिषद्भाष्यव्याख्याने श्रीआनंदगिरिकृतं टिप्पणं संपूर्णम् समा
प्तम् संवत् १८९४ मेषार्कभुक्तदिनानि २२ भौमवासरे त्रयोदश्यां तिथौ देवपुर्यां लिखितेयम् राम १२

केशवरामेण



